श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चतुरशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चतुरशीतितमं दशकम् ॥

## सूर्यग्रहणयात्रावर्णनम्

क्वचिदथ तपनोपरागकाले
पुरि निदधत् कृतवर्मकामसूनू।
यदुकुलमहिलावृतः सुतीर्थं
समुपगतोऽसि समन्तपञ्चकाख्यम् ॥ **84.1** ॥

बहुतरजनताहिताय तत्र
त्वमपि पुनन् विनिमज्य तीर्थतोयम्।
द्विजगणपरिमुक्तवित्तराशिः
सममिलथाः कुरुपाण्डवादिमित्रैः ॥ **84.2** ॥

तव खलु दयिताजनैः समेता
द्रुपदसुता त्वयि गाढभक्तिभारा।
तदुदितभवदाहृतिप्रकारैः
अतिमुमुदे सममन्यभामिनीभिः ॥ **84.3** ॥

तदनु च भगवन् निरीक्ष्य गोपा -
नतिकुतुकादुपगम्य मानयित्वा।
चिरतरविरहातुराङ्गरेखाः
पशुपवधूः सरसं त्वमन्वयासीः ॥ **84.4** ॥

सपदि च भवदीक्षणोत्सवेन
प्रमुषितमानहृदां नितम्बिनीनाम्।

अतिरसपरिमुक्तकञ्चुलीके
    परिचयहृद्यतरे कुचे न्यलैषीः ॥ **84.5** ॥

रिपुजनकलहैः पुनः पुनर्मे
    समुपगतैरियती विलम्बनाऽभूत्।
इति कृतपरिरम्भणे त्वयि द्रा -
    गतिविवशा खलु राधिका निलिल्ये ॥ **84.6** ॥

अपगतविरहव्यथास्तदा ता
    रहसि विधाय ददाथ तत्त्वबोधम्।
परमसुखचिदात्मकोऽहमात्मे -
    त्युदयतु वः स्फुटमेव चेतसीति ॥ **84.7** ॥

सुखरसपरिमिश्रितो वियोगः
    किमपि पुराऽभवदुद्धवोपदेशैः।
समभवदमुतः परं तु तासां
    परमसुखैक्यमयी भवद्विचिन्ता ॥ **84.8** ॥

मुनिवरनिवहैस्तवाथ पित्रा
    दुरितशमाय शुभानि पृच्छ्यमानैः।
त्वयि सति किमिदं शुभान्तरैरि -
    त्युरुहसितैरपि याजितस्तदाऽसौ ॥ **84.9** ॥

सुमहति यजने वितायमाने
    प्रमुदितमित्रजने सहैव गोपाः।
यदुजनमहितास्त्रिमासमात्रं
    भवदनुषङ्गरसं पुरेव भेजुः ॥ **84.10** ॥

व्यपगमसमये समेत्य राधां
    दृढमुपगूह्य निरीक्ष्य वीतखेदाम्।

प्रमुदितहृदयः पुरं प्रयातः
पवनपुरेश्वर पाहि मां गदेभ्यः ॥ **84.11** ॥

॥ इति श्रीमन्नारायणीये चतुरशीतितमं दशकं समाप्तम् ॥